**KARNATAKA SAMSKRIT UNIVERSITY**
Sri Chamarajendra Samskrit College Campus
Pampa Mahakavi Road, Chamarajapete, Bengaluru-560018.

**कर्नाटक–संस्कृत–विश्वविद्यालयः**
श्री चामराजेन्द्र संस्कृत महाविद्यालयस्य परिसरः
पम्पमहाकविमार्गः, चामराजपेटे, बेङ्गलूरु – ५६००१८.

Telefax: 080-26701303 | Website: www.ksu.ac.in | Email: karnatakasanskrituniversity@gmail.com

**प्रो. का.इ. देवनाथन्**
**कुलपतिः**

दूरवाणी: **79890 76807**
इ–मेल्: **vc.ksu2014@gmail.com**

07.12.2020

**प्रस्तावना**

विदितमेव सर्वेषां यत् धर्मसूत्रेषु ऋग्वेदः एकविंशतिशाखः इति परिगणितः । तत्र शाकलबाष्कलाश्वलायनशाङ्खायनशाखाः प्रसिध्दाः भवन्ति । मान्डूक्यशाखापि एतदन्तर्गता । ऋग्वेदे त्रिष्टुप्छन्दसि 3920 ऋचः, गायत्रीछन्दसि 2450 ऋचः, अनुष्टप्–छन्दसि 8250 ऋचः भवन्ति । इदानीं शाकलशाखाया एव अध्ययनं प्रचलति इत्यपि सर्वविदितमेव । "तेषां ऋक् यत्र अर्थवशेन पादव्यवस्था" इति जैमिनिसूत्रं ऋङ्मन्त्राणां पादव्यवस्थायुक्तत्त्वं प्रतिपादयति । अत्र च ऋग्वेदे गायत्री, ऊष्णिक्, अनुष्टुप्, बृहती, पङ्क्ति, त्रिष्टुप्, जगती इत्यादीनि छन्दांसि प्रसिद्धानि । अतिजगत्यादयः छन्दोविशेषा अपि तत्र तत्र दृश्यन्ते ।

ऋग्वेदस्य सायणाचार्यभाष्यं प्रसिद्धं वर्तते । इदं च भाष्यं क्रिस्तोः परं चतुर्दश शताब्द्यां लिखितम् । परन्तु क्रिस्तोः पूर्वं यास्कनिरुक्ते बह्वीनां ऋचाम् अर्थवर्णनं दृश्यते । क्रिस्तोः परम् एकादशशताब्द्यां माधवभट्टैः ऋगर्थदीपिकाग्रन्थः, ततः प्राचीनैः स्कन्दस्वामिभिः सप्तमशताब्द्यां स्थितैः विरचितव्याख्यानं च प्रसिद्धे भवतः । एवं सत्यपि ऋग्वेदस्य विशदं व्याख्यानं सायणरचितमेव इति प्रसिद्धिर्भवति ।

ऋग्वेदे अग्निसूक्तेन आरम्भः भवति । इन्द्रादयः देवताः प्रसिद्धाः । तत्र त्रिषु लोकेषु 3339 देवताः आसन्निति एको मन्त्रः ब्रूते । स च मन्त्रः एवं "त्रीणि शता त्रिसहस्राणि अग्निं त्रिंशच्च देवाः न वाचा सपर्ययन्" (111–9–9) इतिभवति । तत्र भूलोकदेवताः अग्निपृथिवीत्वष्टावनस्पतिप्रभृतयः, अन्तरिक्षदेवताः वायुवरुणरुद्र–इन्द्रमरुत्सवितृयम–अपान्नपात्–बृहस्पतिप्रभृतयः, द्युलोकदेवताः सूर्यविश्वदेव–अश्विनीप्रभृतयः ऋग्वेदे कीर्तिताः भवन्ति । अस्मिन् वेदे एकैकस्याः देवतायाः अपि उपरि बहुस्तुतिः कृता वर्तते ।

अस्मिन् वेदे बहवः वृत्तान्ताः देवताविषये उक्ताः । अग्निविषये उदाहरणरूपेण बहूनि नामानि अग्नि–सहसस्पुत्र–धूमकेतु–रयीणां पति–गृहपति–रक्षोहप्रभृतिभिः नामभिः अग्नेः वर्णनं विधाय सः ज्वालाकेशः अग्नायीपतिः च भवतीति विवृत्य अग्नेः अनुग्रहेणैव दीर्घं आयुः, सत्पुत्राः च लभ्यन्ते इति निरूपितम् । "धूमस्ते केतुः अभवत्" (5–11–3) एवमेव "अग्निं भुवद् रयिपती रयीणां" (1–60–4) इत्यादीनि वाक्यानि अत्र प्रमाणानि भवन्ति । एवं सवितृदेवता दुस्स्वप्नान् नाशयति, सोमः वृत्रहन्ता भवति, रुद्रः मरुतां पिता रोगाणां निवर्तकः इत्यादिकं विवृतम् । वराहशब्दः वराहसदृशशक्तिमत्त्वेन रुद्रपरः इति व्याख्यातं सायणाचार्यैः । "मरुतां रुद्रः पिता पृश्निः माता" इति वेदः वदति । "रुद्रस्य सूनवः सुदससः, दधिरे पृश्निमातरः" (1–85–1,2) । एवं विष्णोः त्रिलोकविक्रमणं तत्र वर्णित्रं वर्तते ऋग्वेदे प्रथममण्डले । एवमन्यासां देवतानामपि वर्णनं तत्र तत्र दरीदृश्यते ।

ऋग्वेदस्य संहितायां यद्यपि इन्द्रादिदेवताः निरूपिताः तथापि तत्र तत्त्वार्थनिरूपणमपि दृश्यते । "इन्द्रं मित्रं वरुणमग्निमाहुः अथो दिव्यः स सुपर्णः गरुत्मान् एकं सद्विप्राः बहुधा वदन्ति"(1–164–46) इत्यादिवाक्यानि तत्त्वप्रतिपादकानि ऋग्वेदे लभ्यन्ते ।

एतादृशस्य ऋग्वेदस्य अर्थवर्णनं बहुकठिनं भवति । ऋग्वेदस्य पदानि प्रसिद्धलौकिकपदतुल्यानि प्रायः न भवन्ति । मन्त्राधिकरणे "सृण्येव जर्भरीतुर्फरी" इति मन्त्रः, तथा "अम्यक्सात इन्द्र" इत्यादिमन्त्रश्च विचारितौ । तत्र मन्त्राणां बहूनां अर्थवत्त्वं वक्तुं न शक्यते इति पूर्वपक्षं विधाय अर्थनिर्णयः कृतः । "सतः परम् अविज्ञानम्" इति सूत्रे मीमांसाव्याख्यातृभिः एतयोः ऋचोः विस्तरेण व्याख्यानं प्रदर्शितम् । तादृशः कठिनोऽयं ऋग्वेदः श्रीमता विदुषा रङ्गनाथवर्येण महत्या श्रद्धया श्रीरामचन्द्रचरणयुगलसमर्पितमनसा सायणभट्टभास्करादिप्राचीनभाष्यं नवीनं च कपालिदयानन्दादिविरचितं व्याख्याननिवहं च आलोढ्य अत्यन्तसारल्येन ध्वनिदीपिकानामकं भावप्रकाशपरं व्याख्यानं व्यरचि । अस्मिन् व्याख्याने साक्षात् शब्दार्थनिरूपणं कृतमिति विशेषः । पाठकानां यथा कुत्रापि मूलार्थविषये स्वकीयभाषाविषये वा संशयः नोदीयात् तथा विशदतमा विवृतिः इयं वर्तते इति विशेषः । तत्र तत्र पदानाम् अर्थवर्णनकाले धातुप्रदर्शनं महते गुणाय कल्पते । एकस्य पद्यस्य बह्वर्थनिरूपणं पाश्चात्यविद्वांसः दोषं मन्यन्ते । अस्मिन् व्याख्याने सारभूत एक एव अर्थः तत्र तत्र वर्णितः । अस्य ग्रन्थस्य सरलरीतिः माम् आवर्जयति

ऋचाम् अर्थवर्णने तत्त्वपरतया अर्थवर्णनमाश्रितं ग्रन्थकर्त्रा इति प्रमोदास्पदम् । इयं रीतिः यद्यपि सायाणाचार्यादिभिः आश्रितैव । तथापि भौतिकरीत्यैव व्याख्यानं कैश्चित् क्रियते । मीमांसाव्याख्यातारस्तु देवतापराणां ऋचामपि कर्मसमवेतार्थकतया व्याख्यानं विधाय चारितार्थ्यं मन्वते । उदाहरणरूपेण "देवस्य त्वा सवितुः प्रसवे" इति मन्त्रः बहुधा विचारितः नवमाध्याये प्रथमपादे द्वादशे अधिकरणे । तत्र सवित्रादिपदानां लक्षणया अग्न्यादिपरत्वं वा इत्यादिकं चिन्तितम् । एतादृशक्लिष्टकल्पनाः तत्रैव अवगन्तव्याः । यदि समग्रस्य ऋग्वेदस्य तत्त्वार्थपरत्त्वम् उच्यते तदानीं क्लेशः अर्थवर्णने न भवति, पुरुषार्थपर्यवसायित्वं च भवेत् ।

श्रीमद्वेदान्तदेशिकविरचितः सङ्कल्पसूर्योदयः प्रसिद्धः ग्रन्थः । तत्र आत्मगुणाः नाटके पात्रतां प्राप्नुवन्ति । सङ्कल्पसूर्योदये आत्मा नायकः, तस्य सद्गुणाः दुर्गुणाश्च पात्राणि भवन्ति । भगवत्सङ्कल्परूपसूर्योदयः यदा भवति तदा मोक्षः भवतीति दशभिः अङ्कैः निरूपितम् । तद्वत् सम्पूर्णः ऋग्वेदः तत्त्वपरः, देवताविषये तत्र तत्र उपपादितानि लौकिक–आख्यानानि च आध्यात्मिकतत्त्वपराणीति निरूपयन्नयं प्रबन्धः अत्यन्तं श्लाघास्पदं भवति । अहम् अस्य ग्रन्थस्य प्रकाशं प्रसारं तद्द्वारा वेदानां यथावदर्थज्ञानं च भगवतः श्रीवेङ्कटेशस्य सन्निधौ साञ्जलिबन्धं प्रार्थयामि

विदुषाम् अनुचरः
को. इ. देवनाथः